030651

Indira Gandhi National
Centre for the Arts

अ॰ सं॰ ४३८९६

तं चूर्णहस्ता स्तं ब्रह्मालंकारेणालंकुर्वंति स ब्रह्मालंकारेणालंकृतो ब्रह्मविद्वान् ब्रह्माभि
प्रैति स आगच्छत्यारं ह्रदं तं मनसात्येति तमित्वा संप्रतिविदो मज्जंति स आगच्छति मुहूर्तान्ये
ष्टिहांस्तेऽस्मादपद्रवंति स आगच्छति विजरां नदीं तां मनसैवात्येति तत्सुकृतदुष्कृते धूनु
ते तस्य प्रिया ज्ञातयः सुकृतमुपयंत्यप्रिया दुष्कृतं तद्यथा रथेन धावयन् रथचक्रे
पर्यवेक्षेतैवमहोरात्रे पर्यवेक्षेतैवं सुकृतदुष्कृते सर्वाणि च द्वंद्वानि स एष विसु
कृतो विदुष्कृतो ब्रह्मविद्वान् ब्रह्मैवाभिप्रैति। स आगच्छतील्यं वृक्षं तं ब्रह्मगंधः
प्रविशति स आगच्छति सालज्यं संस्थानं तं ब्रह्मरसः प्रविशति स आगच्छत्यपरा
जितमायतनं तं ब्रह्मयशः प्रविशति स आगच्छतीन्द्रप्रजापती द्वारगोपौ तावस्मा
दपद्रवतः स आगच्छति विभुप्रमितं तं ब्रह्मतेजः प्रविशति स आगच्छति विचक्षणा
मासंदीं बृहद्रथंतरे सामनी पूर्वौ पादौ श्यैतनौधसे चापरौ वैरूपवैराजे अनूच्ये शा
क्वररैवते तिरश्ची सा प्रज्ञा प्रज्ञया हि विपश्यति स आगच्छत्यमितौजसं पर्यंकं स प्रा

रास्तस्य न्यूर्तं बर्त्मविष्यं चक्षुषी पूर्वौ पादौ श्रीश्चेरा चापरौ भद्रयज्ञायज्ञिये शीर्षण्ये

बृहद्रथंतरे अनूच्ये ऋचश्च सामानि च प्राचीनातानि यजूंषि तिरश्चीनानि सो

मांशव उपस्तरणमुद्गीथ उपश्रीः श्रीरुपबर्हणं तस्मिन्ब्रह्मास्ते तमित्थंवि

त्पादेनैवाग्र आरोहति तं ब्रह्माह कोऽसीति तं प्रतिब्रूयात् ।५। ऋतुरस्म्या

र्तवोऽस्म्याकाशाद्योनेः संभूतो भार्यायै रेतः संवत्सरस्य तेजो भूतस्य भूतस्य भूतस्य भूत

स्य त्वमात्मासि यस्त्वमसि सोऽहमस्मीति तमाह कोऽहमस्मीति सत्यमिति ब्रूयात्किं तद्यत्सत्यमिति

यदन्यद्देवेभ्यश्च प्राणेभ्यश्च तत्सदथ यद्देवाश्च प्राणाश्च तत्त्यं तदेकया वाचाभिव्याह्रि

यते सत्यमित्येतावदिदं सर्वमिदं सर्वमस्मीत्येवैनं तदाह तदेतच्छ्लोकेनाभ्युक्तं ।६। यजूदरः

सामशिरा असावृङ्मूर्तिरव्ययः स ब्रह्मेति विज्ञेय ऋषिर्ब्रह्ममयो महानिति तमाह केन मे

पौंस्नानि नामान्याप्नोषीति प्राणेनेति ब्रूयात्केन नपुंसकानीति मनसेति केन स्त्रीनामानी

ति वाचेति केन गंधानिति प्राणेनेति केन रूपाणीति चक्षुषेति केन शब्दानीति श्रो

त्रेणेति केनान्नरसानिति जिह्वयेति केन कर्माणीति हस्ताभ्यामिति केन सुखदुःखे इति ६

शरीरेणेति केनानंदं रतिं प्रजातिमित्युपस्थेनेति केनेत्या इति पादाभ्यामिति केन धियो विज्ञा

तव्यं कामानिति प्रज्ञयैवेति ब्रूयात्तमाहापो वै खलु मेऽसावयं ते लोक इति सा या ब्रह्मणो जि

तिर्या व्यष्टिस्तां जितिं जयति तां व्यष्टिं व्यश्नुते य एवं वेद य एवं वेद इत्यार[illegible] प्र०॥१॥

ॐ प्राणो ब्रह्मेति ह स्माह कौषीतकिस्तस्य ह वा [illegible] तस्य ब्रह्मणो मनो दूतं चक्षुर्गोप्तृ

श्रोत्रं संश्रावयितृ वाक्परिवेष्ट्री स यो ह वा एतस्य प्राणस्य ब्रह्मणो मनो दूतं वेद दूतवान्भ

वति यश्चक्षुर्गोप्तृ गोप्तृमान्भवति य० श्रोत्रं संश्रावयितृ संश्रावयितृमान्भवति यो वा

चं परिवेष्ट्रीं परिवेष्ट्रीमान्भवति तस्मै वा एतस्मै प्राणाय ब्रह्मण एता देवता अयाचमा

नाय बलिं हरंत्येवं हैवास्मै सर्वाणि भूतान्ययाचमानायैव बलिं हरंति य एवं

वेद तस्योपनिषन्न याचेदिति तद्यथा ग्राममिक्षित्वा लब्ध्वोपविशेन्नाहमतो द

त्तमश्नीयामिति त एवैनमुपमंत्रयंते ये पुरस्तात्प्रत्याचक्षीरन्नेष धर्मो याचतो

भवत्यन्नदास्त्वेवैनमुपमंत्रयंते ददाम त इति ।१। प्राणो ब्रह्मेति ह स्माह पैंग्यस्त

स्य वा एतस्य प्राणस्य ब्रह्मणो वाक् परस्ताच्चक्षुरारुंधते चक्षुः परस्ताच्छ्रोत्रमारुं

धते श्रोत्रं परस्तान्मन आरुंधते मनः परस्तात्प्राण आरुंधते तस्मै वा एतस्मै प्राणा
य ब्रह्मण एता देवता अयाचमाना बलिं हरंत्येवं हैवास्मै सर्वाणि भूतान्ययाच
मानायैव बलिं हरंति य एवं वेद तस्योपनिषन्न याचेदिति तद्यथा ग्रामं भिक्षित्वाल
ब्ध्वोपविशेन्नाहमतो दत्तमश्नीयामिति त एवैनमुपमंत्रयंते ये पुरस्तात्प्रत्याच
क्षीरन्नेष धर्मो याचितो भवत्यन्नदास्त्वेवैनमुपमंत्रयंते ददाम त इति ॥२॥ अ
त थात एकधनावरोधनं यदेकधनमभिध्यायात्पौर्णमास्यां वामावास्यायां वा शु
द्धपक्षे वा पुण्ये नक्षत्र एतेषामेकस्मिन्पर्वण्यग्निमुपसमाधाय परिसमुह्य
परिस्तीर्य पर्युक्ष्य दक्षिणं जान्वाच्य स्रुवेणाज्याहुतीर्जुहोति वाङ्नाम देव
तावरोधनी सा मेऽमुष्मादिदमवरुंध्यात्तस्यै स्वाहा प्राणो नाम देवतावरोध
नी सा मेऽमुष्मादिदमवरुंध्यात्तस्यै स्वाहा चक्षुर्नाम देवतावरोधनी सा मेऽमुष्मा
दिदमवरुंध्यात्तस्यै स्वाहा श्रोत्रं नाम देवतावरोधनी सा मेऽमुष्मादिदमवरुं
ध्यात्तस्यै स्वाहा मनो नाम देवतावरोधनी सा मेऽमुष्मादिदमवरुंध्यात्तस्यै स्वाहा १०

प्रज्ञा नाम देवतावरोधनी सा मेऽमुष्मादिदमवरुंध्यात्तस्यै स्वाहेत्यथ धूमगंधं
प्रजिघ्रायाज्यलेपेनांगान्यनुविमृज्य वाचंयमोऽभिप्रव्रज्यार्थं ब्रूयाद्दूतं वा प्रहिणुयाल्लभते हैव ।
॥३॥ अथातो दैवस्मरो यस्य प्रियो बुभूषेद्यस्यै वा यस्य वा येषां वा यासां वैतेषामेवैकस्मिन्पर्वण्ये
कयैवावृतैताज्याहुतीर्जुहोति वाचं ते मयि जुहोम्यसौ स्वाहा प्राणं ते मयि जुहोम्यसौ स्वाहा
चक्षुस्ते मयि जुहोम्यसौ स्वाहा श्रोत्रं ते मयि जुहोम्यसौ स्वाहा मनस्ते मयि जुहोम्यसौ स्वाहा
प्रज्ञां ते मयि जुहोम्यसौ स्वाहेत्यथ धूमगंधं प्रजिघ्रायाज्यलेपेनांगान्यनुविमृज्य वाचं
यमोऽभिप्रव्रज्य संस्पर्शं जिगमिषेदपि वाताद्वा तिष्ठेत्संभाषमाणः प्रियो हैव भवति
स्मरंते हैवास्य ॥४॥ अथातः संयमनं प्रातर्दनमांतरमग्निहोत्रमित्याचक्षते यावद्वै पुरु
षो भाषते न तावत्प्राणितुं शक्नोति प्राणं तदा वाचि जुहोति यावद्वै पुरुषः प्राणिति न
तावद्भाषितुं शक्नोति वाचं तदा प्राणे जुहोत्येते अनंते अमृते आहुती जाग्रच्च स्वपंश्च संततं जु
होत्यथ या अन्या आहुतयोऽन्तवत्यस्ताः कर्ममय्यो हि भवंति तद्ध स्मैतत्पूर्वे विद्वांसोऽग्नि
होत्रं न जुहवांचक्रुः ॥५॥ उक्थं ब्रह्मेति ह स्माह शुष्कभृंगारस्तदृगित्युपासीत सर्वाणि

Indira Gandhi National Centre for the Arts

हास्मै रूपाणि श्रेष्ठायाभ्यर्चंति न घुरुरित्युपास्ता तस्म वर्णाणि हास्मै रूपाणि श्रेष्ठा
यथुरूपं ते तस्मामेत्युपासीत सर्वाणि हास्मै रूपाणि श्रेष्ठाय संनमंते तद्यारित्यु
तद्यद्वाद्युपासीत
पासीत तत्तेजर्न इत्युपासीत न घ पौत घ्रीमत्तमं यशस्वितमं तेजस्वितममिति शश्वेषु भु
वत्येवं हैवस सर्वेषु भूतेषु श्रीमत्तमो यशस्वितमस्तेजस्वितमो भवति य एवं वेद तदे
तदैष्टिकं कर्म यमात्मानमध्वर्युः संस्करोति तस्मिन्यजुर्मयं प्रवदति यजुर्मय ऋङ्मयं हो
त ऋङ्मये साममयमुद्गाता स एष त्रय्यै विद्याया आत्मै ष उ एवितदिंद्रस्यात्मात्र
वति य एवं वेद ।६। अथातः सर्वजितः कौषीतकेस्त्रीण्युपासनानि भवंति सर्वजिद्धस्म कौषी
तकिरुद्यंतमादित्यमुपतिष्ठते यज्ञोपवीतं कृत्वोदकमानीय त्रिः प्रसिच्योदपात्रं वर्गोसि
पाप्मानं मे वृङ्धीत्येतयैवामध्ये संतमुद्वर्गोसि पाप्मानं म उद्वृङ्धीत्येतयैवास्तंयंतं
पाप्मानं मे वृङ्धीति तद्यदहोरात्राभ्यां पापमकरोत्संतद्वृङ्क्ते तथो एवैवं
सं वर्गोसि पाप्मानं मे भंवृङ्ध्यीति तद्यदहोरात्राभ्यां पापं करोति संतद्वृङ्क्ते ।७। अथ
विद्वानेतयैवावृतादित्यमुपतिष्ठते यदहोरात्राभ्यां पापमाझंद्रमसं दृश्यमानमुपतिष्ठेतैतयैवावृता
मासि मास्यमावास्यायां पश्चाच्चंद्रमसं दृश्यमानमुपतिष्ठेतैतयैवावृता
रितरुणे वा प्रत्यस्य यन्मे सुसमिद्धं हृदयं दिवि श्रितं चंद्रमसि श्रितं तन्मन्येहं मां तद्विद्वांसं ११

मा हं पुत्रमघं रुदमिति न ह तस्मात्पूर्वाः प्रजाः प्रैतीति जातपुत्रस्याथाजातपुत्रस्याप्या
यस्व समेतु ते सं ते पयांसि समु यंतु वाजा यमादित्या अंशुमाप्याययंतीत्येतास्तिस्र ऋ
चो जपित्वा मास्माकं प्राणेन प्रजया पशुभिराप्यायिष्ठा योस्मान्द्वेष्टि यं च वयं द्विष्म
स्तस्य प्राणेन प्रजया पशुभिराप्यायस्वेत्यैंद्रीमावृतमावर्त आदित्यस्यावृतम
न्वावर्त इति दक्षिणं बाहुमन्वावर्तते ।८। अथ पौर्णमास्यां पुरस्ताच्चंद्रमसं दृश्य
मानमुपतिष्ठेतैतयैवावृता सोमो राजासि विचक्षणः पंचमुखोसि प्रजापतिर्ब्राह्म
णस्त एकं मुखं तेन मुखेन राज्ञोसि तेन मुखेन मा मन्नादं कुरु राजा त एकं मुखं ते
न मुखेन विशोसि तेन मुखेन मामन्नादं कुरु श्येनस्त एकं मुखं तेन मुखेन पक्षि
णोसि तेन मुखेन मामन्नादं कुर्वग्निष्ट एकं मुखं तेन मुखेनेमं लोकमत्सि तेन मु
खेन मामन्नादं कुरु त्वयि पंचमं मुखं तेन मुखेन सर्वाणि भूतान्यत्सि तेन मुखे
न मामन्नादं कुरु मास्माकं प्राणेन प्रजया पशुभिरपक्षेष्ठा योस्मान्द्वेष्टि यं च वयं द्वि
ष्मस्तस्य प्राणेन प्रजया पशुभिरपक्षीयस्वेति दैवीमावृतमावर्त आदित्यस्यावृतमन्वा
वर्त इति दक्षिणं बाहुमन्वावर्तते ।९। अथ संवेश्यन्जायायै हृदयमभिमृशेत् यत्ते सु

Indira Gandhi National Centre for the Arts

श्री मे कुह्यं श्रित मंतः प्रजापतौ वेनामृतत्वस्येशाने मा त्वं पुत्र्यमघं निगाइति न
ह्यस्याः पूर्वाः प्रजाः प्रैताति ।१०॥ अथ प्रोष्या यन्पुत्रस्य मूर्द्धानमभिजिघ्रेतु । अंगादं
गात्संभवसि हृदयादधिजायसे । आत्मा वै पुत्र नामासि स जीव शरदः शतमिति
नामास्य दधात्यश्मा भव परशुर्भव हिरण्यमस्तृतं भव वेदो वै पुत्र नामासि स जीव श
रदः शतमिति नामास्य गृह्णात्यथैनं परिगृह्णाति येन प्रजापतिः प्रजाः पर्यगृह्णात्तदरि
ष्टै तेन त्वा परिगृह्णाम्यसाविति अथास्य दक्षिणे कर्णे जपत्यस्मे प्रयंधि मघवं
न्नृजीषिन्नितीन्द्र श्रेष्ठानि द्रविणानि धेहीति सच्यं मा व्यत्थिष्ठाः शतं शरद
आयुषो जीव स्व पुत्र ते नाम्ना मूर्द्धानमभिजिघ्रामीति त्रिरस्य मूर्द्धानमभिजि
घ्रामीति त्रिरस्य मूर्द्धानमभिजिघ्रेद्गवां त्वा हिंकारेणाभिहिंकरोमीति त्रिर
स्य मूर्द्धानमभिहिंकुर्यात् ॥११॥ अथातो दैवः परिमर एतद्वै ब्रह्म दीप्यते य
दग्निर्ज्वलत्यथैतन्म्रियते यन्न ज्वलति तस्यादित्यमेव तेजो गच्छति वायुं प्राण
एतद्वै ब्रह्म दीप्यते यदादित्यो दृश्यतेऽथैतन्म्रियते यन्न दृश्यते तस्य चंद्रमसमेव तेजो ग १२

च्छति वायुं प्राणमेतद्वै ब्रह्म दीप्यते यच्चंद्रमा दृश्यतेऽथैतन्म्रियते यन्न दृश्यते तस्य विद्यु
तमेव तेजो गच्छति वायुं प्राणमेतद्वै ब्रह्म दीप्यते यद्विद्युद्विद्योततेऽथैतन्म्रियते यन्न
विद्योतते तस्या दिशमेव तेजो गच्छति वायुं प्राणं ता वा एताः सर्वा देवता वायुमे
व प्रविश्य वायौ सृप्ता न मृच्छंते तस्मादेव पुनरुदीरत इत्यधिदैवतमथाध्यात्मं ॥१२॥
एतद्वै ब्रह्म दीप्यते यद्वाचा वदत्यथैतन्म्रियते यन्न वदति तस्य चक्षुरेव तेजो
गच्छति प्राणं प्राणमेतद्वै ब्रह्म दीप्यते यच्चक्षुषा पश्यत्यथैतन्म्रियते यन्न
त्र पश्यति तस्य श्रोत्रमेव तेजो गच्छति प्राणं प्राणमेतद्वै ब्रह्म दीप्यते यच्छ्रोत्रेण शृणो
त्यथैतन्म्रियते यन्न शृणोति तस्य मन एव तेजो गच्छति प्राणं प्राणमेतद्वै ब्रह्म दी
प्यते यन्मनसा ध्यायत्यथैतन्म्रियते यन्न ध्यायति तस्य प्राणमेव तेजो गच्छ
ति प्राणं प्राणं ता वा एताः सर्वा देवताः प्राणमेव प्रविश्य प्राणे सृप्ता न मृच्छं
ते तस्मादेव पुनरुदीरते तद्यदि ह वा एवं विद्वांसमुभौ पर्वतावभिप्रवर्त्तेयातां द
क्षिणश्चोत्तरश्च स्तृषमाणौ न हैनं स्तृण्वीयातामथ य एनं द्विषंति यांश्च स्वयं द्वेष्टि त ए

Indira Gandhi National Centre for the Arts

चैनं परिम्रियन्ते ॥१३॥ अथातो निःश्रेयसादानमेता ह वै देवता अहंश्रेयसे विवदमा
ना अस्माच्छरीरादुच्चक्रमुस्तद्वाक्यपात शुष्कं दारुभूतं शिश्येऽथैतद्वाक्प्रविवेशत
द्वाचावदच्छिश्य एवाथैनं चक्षुः प्रविवेशत द्वाचा वदत्पश्यंश्चक्षुषा पश्यच्छिश्य एवाथै
नं श्रोत्रं प्रविवेशत द्वाचा वदत्पश्यंश्चक्षुषा पश्यञ्छ्रोत्रेण शृण्वच्छिश्य एवाथैतन्मनः प्रविवे
शत द्वाचा वदत्पश्यंश्चक्षुषा पश्यञ्छ्रोत्रेण शृण्वन्मनसा ध्यायच्छिश्य एवाथैनं प्राणः प्रविवेश
तत्तत एव समुत्तस्थौ ता वा एताः सर्वा देवताः प्राणे निःश्रेयसं विदित्वा प्राणमेव प्रज्ञात्मा
नमभिसंभूय सह वै वैताः सर्वैरस्माच्छरीरादुच्चक्रमुस्ते वायुः प्रविष्टा आकाशात्मान
स्वर्ययुस्तथो एवैवं विद्वान्प्राणे निःश्रेयसं विदित्वा प्राणमेव प्रज्ञात्मानमभिसंभूय स
हैवैतैः सर्वैरस्माच्छरीरादुत्क्रामति स वायुः प्रविष्ट आकाशात्मा स्वरेति स तद्गच्छति
यत्रैते देवास्तत्प्राप्य यदमृता देवास्तदमृतो भवति य एवं वेद ॥१४॥ अथातः पितापुत्रीयं सं
प्रदानमित्याचक्षते पितापुत्रं प्रेष्यन्नाह्वयति नवैस्तृणैरगारं संस्तीर्याग्निमुपसमाधायो
दकुंभं सपात्रमुपनिधायाहतेन वाससा संप्रच्छन्नः पिता एत्य पुत्रमुपरिष्टादभिनि
पद्यत इंद्रियैरिंद्रियाणि संस्पृश्यापि वास्मा आसीनायाभिमुखायैव संप्रदध्यादथास्मै १३

संप्रयच्छति वाचं मे त्वयि दधानीति पिता वाचं ते मयि दध इति पुत्रः प्राणं मे त्वयि दधा
नीति पिता प्राणं ते मयि दध इति पुत्रश्चक्षुर्मे त्वयि दधानीति पिता चक्षुस्ते मयि दध इति पु
त्रः श्रोत्रं मे त्वयि दधानीति पिता श्रोत्रं ते मयि दध इति पुत्रोऽन्नरसान्मे त्वयि दधानीति पितान्न
रसांस्ते मयि दध इति पुत्रः कर्माणि मे त्वयि दधानीति पिता कर्माणि ते मयि दध इति पुत्रः सु
खदुःखे मे त्वयि दधानीति पिता सुखदुःखे ते मयि दध इति पुत्र आनंदं रतिं प्रजातिं मे
त्वयि दधानीति पितानंदं रतिं प्रजातिं ते मयि दध इति पुत्र इत्यां मे त्वयि दधानीति पितेत्यां
ते मयि दध इति पुत्रो मनो मे त्वयि दधानीति पिता मनस्ते मयि दध इति पुत्रः प्रज्ञां मे त्व
यि दधानीति पिता प्रज्ञां ते मयि दध इति पुत्रो यद्यु वाऽभिगदः स्यात्समासेनैव ब्रूया
त्प्राणान्मे त्वयि दधानीति पिता प्राणांस्ते मयि दध इति पुत्रोऽथ दक्षिणावृदुपनिष्क्रामति तं
पितानुमंत्रयते यशो ब्रह्मवर्चसं कीर्तिस्त्वा जुषतामित्यथेतरः सव्यमंसमन्ववे
क्षते पाणिनांतर्धाय वसनांतेन वा प्रच्छाद्य स्वर्गाल्लोकान्कामानाप्नुहीति स यद्यगदः स्या
त्पुत्रस्यैश्वर्ये पिता वसेत्परि वा व्रजेद्यद्यु वै प्रेयाद्यथैवैनं समापयेयुर्यथा समापयितव्यो भ
वति यथा समापयितव्यो भवति ॥ इत्यारण्यके चतुर्थोऽध्यायः समाप्तः ॥१५॥

Indira Gandhi National Centre for the Arts

प्रतर्दनो ह वै दैवोदासिरिंद्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण च तं हेंद्र
उवाच प्रतर्दन वरं ते ददानीति स होवाच प्रतर्दनस्त्वमेव वृणीष्व यं त्वं मनुष्या
य हिततमं मन्यस इति तं हेंद्र उवाच न वै वरो वरस्मै वृणीते त्वमेव वृणीष्वेत्यव
रो वै किल म इति स होवाच प्रतर्दनो थो खल्विंद्रः सत्यादेव नेयाय सत्यं हींद्रः स हेंद्र
उवाच मामेव विजानीह्येतदेवाहं मनुष्याय हिततमं मन्ये यो मां विजानीयात्त्रिशीर्षाणं त्वाष्ट्रमह
नमरुन्मुखान्यतीन्सालावृकेभ्यः प्रायच्छं बह्वीः संधा अतिक्रम्य दिवि प्रह्लादीयानतृणमह
मंतरिक्षे पौलोमान्पृथिव्यां कालखंजांस्तस्य मे तत्र न लोम च नामीयते स यो मां वेद न ह
वै तस्य केन च कर्मणा लोको मीयते न स्तेयेन न भ्रूणहत्यया न मातृवधेन न पितृवधेन
नास्य पापं चन चकृषो मुखान्नीलं वेतीति। १। स होवाच प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृत
मित्युपास्स्वायुः प्राणः प्राणो वा आयुर्यावदस्मिंछरीरे प्राणो वसति तावदायुः प्राणेन ह्ये
वास्मिँल्लोकेऽमृतत्वमाप्नोति प्रज्ञया सत्यसंकल्पं स यो मामायुरमृतमित्युपास्ते सर्वमायु
रस्मिँल्लोक एत्याप्नोत्यमृतत्वमक्षितिं स्वर्गे लोके तद्धैक आहुरेकभूयं वै प्राणा गच्छंती
ति न हि कश्चन शक्नुयात्सकृद्वाचा नाम प्रज्ञापयितुं चक्षुषा रूपं श्रोत्रेण शब्दं मनसा ध्यान १५
मेकभूयं वै प्राणा भूयं वै प्राणा भूत्वैकैकमेतानि सर्वाणि प्रज्ञापयंतीति वाचं वदंतीं स

र्वे प्राणा अनुवदंति चक्षुः पश्यत्सर्वे प्राणा अनुपश्यंति श्रोत्रं शृण्वत्सर्वे प्राणा अनुशृण्वंति मनो
ध्यायत्सर्वे प्राणा अनुध्यायंति प्राणं प्राणंतं सर्वे प्राणा अनुप्राणंत्येवमु हैतदिति हेंद्र उवाचास्ति त्वे
व प्राणानां निःश्रेयसमिति। २। जीवति वागपेतो मूकान्हि पश्यामो जीवति चक्षुरपेतोऽन्धान्हि पश्यामो
जीवति श्रोत्रापेतो बधिरान्हि पश्यामो जीवति मनोपेतो बालान्हि पश्यामो जीवति बाहुच्छिन्नो जीव
त्यूरुच्छिन्न इत्येवं हि पश्याम इत्यथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयति तस्मादेतदे
वोक्थमुपासीतेति सैषा प्राणे सर्वाप्तिर्यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राणस्तस्यैषैव दृष्टिरेतद्विज्ञा
नं यत्रैतत्पुरुषः सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन्प्राण एवैकधा भवति तदेनं वाक्सर्वैर्ना
मभिः सहाप्येति चक्षुः सर्वै रूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यातैः सहाप्येति
स यदा प्रतिबुध्यते यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिंगा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः प्रा
णा यथायतनं विप्रतिष्ठंते प्राणेभ्यो देवा देवेभ्यो लोकाः स एष प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्था
पयति तस्मादेतदेवोक्थमुपासीतेति सैषा प्राणे सर्वाप्तिर्यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राणस्त
स्यैषैव सिद्धिरेतद्विज्ञानं यत्रैतत्पुरुष आर्तो मरिष्यन्नाबल्यमेत्य संमोहमेति तमाहुरुदक्रमीच्चित्तं न शृ
णोति न पश्यति न वाचा वदति न ध्यायत्यथास्मिन्प्राण एवैकधा भवति तदेनं वाक्सर्वैर्नामभिः सहाप्येति
चक्षुः सर्वै रूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यातैः सहाप्येति स यदास्माच्छरी
रादुत्क्रामति सहैवैतैः सर्वैरुत्क्रामति। ३। वागेवास्मिन्सर्वाणि नामान्यभिविसृज्यते वाचा सर्वाणि नामान्याप्नो

Indira Gandhi National Centre for the Arts

तिप्राणएवास्मिंसर्वैर्गंधैःसहविसृजतेप्राणेनसर्वान्गंधानाप्नोतिचक्षुरेवास्मिंसर्वाणिरूपाण्यभिवि
सृजंतेचक्षुषासर्वाणिरूपाण्याप्नोतिश्रोत्रमेवास्मिंसर्वैःशब्दैःसहविसृजतेश्रोत्रेणसर्वान्शब्दानाप्नोतिमनए
वास्मिंसर्वाणिध्यातान्यभिविसृजंतेमनसासर्वाणिध्यातान्याप्नोतिसहह्येतावस्मिंछरीरेवसतःसहोत्क्रा
मतोथयत्रास्यैप्रज्ञायैसर्वाणिभूतान्येकंभवंतितद्व्याख्यास्यामः॥४॥वागेवास्याएकमंगमुदूळ्हंतस्यै
नामपरस्तात्प्रतिविहिताभूतमात्राप्राणएवास्याएकमंगमुदूळ्हंतस्यगंधःपरस्तात्प्रतिविहिताभूतमा
त्राचक्षुरेवास्याएकमंगमुदूळ्हंतस्यरूपंपरस्तात्प्रतिविहिताभूतमात्राश्रोत्रमेवास्याएकमंग
मुदूळ्हंतस्यशब्दःपरस्तात्प्रतिविहिताभूतमात्राजिह्वैवास्याएकमंगमुदूळ्हंतस्यान्नरसःपरस्ता
त्प्रतिविहिताभूतमात्राहस्तावेवास्याएकमंगमुदूळ्हंतयोःकर्मपरस्तात्प्रतिविहिताभूतमा
त्राशरीरमेवास्याएकमंगमुदूळ्हंतस्यसुखदुःखेपरस्तात्प्रतिविहिताभूतमात्रोपस्थएवास्याए
कमंगमुदूळ्हंतस्यानंदोरतिःप्रजातिःपरस्तात्प्रतिविहिताभूतमात्रापादावेवास्याएकमंगमुदूळ्हं
तयोरित्याःपरस्तात्प्रतिविहिताभूतमात्रामनएवास्याएकमंगमुदूळ्हंतस्यधीःकामाःपरस्ता
त्प्रतिविहिताभूतमात्रा॥५॥प्रज्ञयावाचंसमारुह्यवाचासर्वाणिनामान्याप्नोतिप्रज्ञयाप्राणंस
मारुह्यप्राणेनसर्वान्गंधानाप्नोतिप्रज्ञयाचक्षुःसमारुह्यचक्षुषासर्वाणिरूपाण्याप्नोति
प्रज्ञयाश्रोत्रंसमारुह्यश्रोत्रेणसर्वान्शब्दानाप्नोतिप्रज्ञयाजिह्वांसमारुह्यजिह्वयासर्वानन्नरसानाप्नोति
प्रज्ञयाहस्तौसमारुह्यहस्ताभ्यांसर्वाणिकर्माण्याप्नोतिप्रज्ञयाशरीरंसमारुह्यशरीरेणसुखदुःखेआप्नोतिप्र
ज्ञयोपस्थंसमारुह्योपस्थेनानंदंरतिंप्रजातिमाप्नोतिप्रज्ञयापादौसमारुह्यपादाभ्यांसर्वाइत्याप्नोतिप्रज्ञया १५

मनःसमारुह्यमनसासर्वाणिध्यातान्याप्नोति॥६॥नहिप्रज्ञापेतावाङ्नामकिंचनप्रज्ञापयेदन्यत्र
मेमनोभूदित्याहनाहमेतन्नामप्राज्ञासिषमितिनहिप्रज्ञापेतःप्राणोगंधंकंचनप्रज्ञापयेदन्य
त्रमेमनोभूदित्याहनाहमेतंगंधंप्राज्ञासिषमितिनहिप्रज्ञापेतंचक्षूरूपंकंचनप्रज्ञापयेदन्यत्रमे
मनोभूदित्याहनाहमेतद्रूपंप्राज्ञासिषमितिनहिप्रज्ञापेतंश्रोत्रंशब्दंकंचनप्रज्ञापयेदन्यत्रमेमनोभू
दित्याहनाहमेतंशब्दंप्राज्ञासिषमितिनहिप्रज्ञापेताजिह्वान्नरसंकंचनप्रज्ञापयेदन्यत्रमेमनोभूदि
त्याहनाहमेतमन्नरसंप्राज्ञासिषमितिनहिप्रज्ञापेतौहस्तौकर्मकिंचनप्रज्ञापयेयातामन्यत्रमेमनोभू
दित्याहतुर्नावामेतत्कर्मप्राज्ञासिष्टेतिनहिप्रज्ञापेतंशरीरंनसुखंनदुःखंकिंचनप्रज्ञापयेदन्यत्र
मेमनोभूदित्याहनाहमेतत्सुखंनदुःखंप्राज्ञासिषमितिनहिप्रज्ञापेतउपस्थआनंदंनरतिंनप्रजा
पतिंकांचनप्रज्ञापयेदन्यत्रमेमनोभूदित्याहनाहमेतमानंदंनरतिंनप्रजापतिंप्राज्ञासिषमितिन
हिप्रज्ञापेतौपादावित्यांकांचनप्रज्ञापयेयातामन्यत्रनोमनोभूदित्याहतुर्नावामेतामित्यांप्रा
ज्ञासिष्वेतिनहिप्रज्ञापेताधीःकाचनसिद्ध्येन्नप्रज्ञातव्यंप्रज्ञायेत॥७॥नवाचंविजिज्ञासीतवक्तारं
विद्याद्घ्राणंनगंधंविजिज्ञासीतघ्रातारंविद्यान्नरूपंविजिज्ञासीतद्रष्टारंविद्यान्नशब्दंविजिज्ञासीतश्रोता
रंविद्यान्नान्नरसंविजिज्ञासीतान्नरस्यविज्ञातारंविद्यान्नकर्मविजिज्ञासीतकर्तारंविद्यान्नसुखदुः
खेविजिज्ञासीतसुखदुःखयोर्विज्ञातारंविद्यान्नानंदंनरतिंनप्रजापतिंविजिज्ञासीतानंदस्य
रतेःप्रजा—तेर्विज्ञातारंविद्यान्नेत्यांविजिज्ञासीततैतारंविद्यान्नमनोविजिज्ञासीतमंतारंविद्यात्ता

Indira Gandhi National
Centre for the Arts

वाएतादशैव भूतमात्रा अधिप्रज्ञं दश प्रज्ञामात्रा अधिभूतं यद्धि भूतमात्रा न स्युर्न प्रज्ञामात्रा
स्युर्यद्वा प्रज्ञामात्रा न स्युर्न भूतमात्राः स्युर्न ह्यन्यतरतो रूपं किंचन सिद्ध्येन्नो एतन्नाना त
द्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्र
ज्ञामात्राः प्राणेऽर्पिताः स एष प्राण एव प्रज्ञात्मानंदोऽजरोऽमृतो न साधुना कर्मणा भूयान्भव
ति नो एवासाधुना कनीयानेष ह्येवैनं साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत ए
ष उ एवासाधु कर्म कारयति तं यमधो निनीषत एष लोकपाल एष लोकाधिपतिरेष सर्वेश्वरः स म
आत्मेति विद्या स म आत्मेति विद्यात् ।८। इत्यारण्यके पंचमोऽध्यायः ।। ॐ अथ ह वै गार्ग्यो बाला
किरनूचानः संस्पष्ट आस सोऽवसदुशीनरेषु सत्वसन्मत्स्येषु कुरुपंचालेषु काशिविदे
हेष्विति स हाजातशत्रुं काश्यमाव्रज्योवाच ब्रह्म ते ब्रवाणीति तं होवाचाजातशत्रुः सहस्रं दद्म
इत्येतस्यां वाचि जनको जनक इति वा उ जना धावंतीति ।१। आदित्ये बृहच्चंद्रमस्यन्नं विद्युति
सत्यं स्तनयित्नौ शब्दो वायाविंद्रो वैकुंठ आकाशे पूर्णमग्नौ विषासहिरित्यप्सु तेज इत्यधि
दैवतमथाध्यात्ममादर्शे प्रतिरूपश्छायायां द्वितीयः प्रतिश्रुत्कायामसुरिति शब्दे मृत्युः
स्वप्ने यमः शरीरे प्रजापतिर्दक्षिणेऽक्षिणि वाचः सव्येऽक्षिणि सत्यस्य ।२। स होवाच बालाकिर्य
एवैष आदित्ये पुरुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन्संवादयिष्ठा बृहत्पां १६

डरवासा अतिष्ठाः सर्वेषां भूतानां मूर्द्धेति वा अहमेतमुपास इति स यो हैतमेवमुपास्तेऽति
ष्ठाः सर्वेषां भूतानां मूर्द्धा भवति ।३। स होवाच बालाकिर्य एवैष चंद्रमसि पुरुषस्तमेवा
हमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन्संवादयिष्ठा अन्नस्यात्मेति वा अहमेतमुपास इ
ति स यो हैतमेवमुपास्तेऽन्नस्यात्मा भवति ।४। स होवाच बालाकिर्य एवैष विद्युति पुरुषस्त
मेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन्संवादयिष्ठाः सत्यस्यात्मेति वा अहमेत
मुपास इति स यो हैतमेवमुपास्ते सत्यस्यात्मा भवति ।५। स होवाच बालाकिर्य एवैष स्तन
यित्नौ पुरुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन्संवादयिष्ठाः शब्दस्यात्मे
ति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते शब्दस्यात्मा भवति ।६। स होवाच
बालाकिर्य एवैष वायौ पुरुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैत
स्मिन्संवादयिष्ठा इंद्रो वैकुंठोऽपराजिता सेनेति वा अहमेतमुपास इति स यो हैतमेव
मुपास्ते जिष्णुर्ह वा अपराजिष्णुरन्यतस्त्यजायी भवति ।७। स होवाच बालाकिर्य एवैष आ
काशे पुरुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन्संवादयिष्ठाः पूर्णमप्रव
र्ति ब्रह्मेति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते पूर्यते प्रजया पशुभिर्यशसा ब्रह्मव
र्चसेन स्वर्गेण लोकेन सर्वमायुरेति ।८। स होवाच बालाकिर्य एवैषोऽग्नौ पुरुषस्तमेवाहमु

Indira Gandhi National Centre for the Arts

पास इति तं होवाचाजातशत्रुर्मा मैतस्मिन्संवादयिष्ठा विषासहिरिति वा अहमेतमुपास
इति स यो हैतमेवमुपास्ते विषासहिर्वा अन्येषु भवति ।९। स होवाच बालाकिर्य एवैषो
ऽग्नौ पुरुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन्संवादयिष्ठास्तेजस्
स आत्मेति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते तेजस आत्मा भवतीत्यधि
दैवतमथाध्यात्मं ।१०। स होवाच बालाकिर्य एवैष आदर्शे पुरुषस्तमेवाहमुपा
स इति तं होवाचाजातशत्रुर्मा मैतस्मिन्संवादयिष्ठाः प्रतिरूप इति वा अह
मेतमुपास इति स हैयो तमेवमुपास्ते प्रतिरूपो हैवास्य प्रजायामाजायते
नाप्रतिरूपः ।११। स होवाच बालाकिर्य एवैष छायायां पुरुषस्तमेवाहमु
पास इति तं होवाचाजातशत्रुर्मा मैतस्मिन्संवादयिष्ठा द्वितीयोऽनपग
इति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते विंदते द्वितीयाद्द्वितीय
वान्भवति ।१२। स होवाच बालाकिर्य एवैष प्रतिश्रुत्कायां पुरुषस्त
मेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन्संवादयिष्ठा असुरि
ति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते न पुराकालात्संमोहमेति ।१३। १७

स होवाच बालाकिर्य एवैष शब्दे पुरुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैत
स्मिन्संवादयिष्ठा मृत्युरिति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते न पुराका
लात्प्रैतीति ।१४। स होवाच बालाकिर्य एवैतत्पुरुषः सुप्तः स्वप्नया चरति तमेवाह
मुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन्संवादयिष्ठा यमो राजेति वा अहमेतमुपा
स इति स यो हैतमेवमुपास्ते सर्वं हास्मा इदं श्रैष्ठ्याय यम्यते ।१५। स होवाच बाला
किर्य एवैष शारीरः पुरुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन्संवा
दयिष्ठाः प्रजापतिरिति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते प्रजायते प्रजया पशु
भिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति ।१६। स होवाच बालाकिर्य एवैष दक्षिणेऽक्षिणि
पुरुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन्संवादयिष्ठा वाच आत्माग्ने
रात्मा ज्योतिष आत्मेति वा अहमेतमुपास इति स यो हैतमेवमुपास्त एतेषां सर्वेषामा
त्मा भवति ।१७। स होवाच बालाकिर्य एवैष सव्येऽक्षिणि पुरुषस्तमेवाहमुपास इति तं हो
वाचाजातशत्रुर्मा मैतस्मिन्संवादयिष्ठाः सत्यस्यात्मा विद्युत आत्मा तेजस आत्मेति वा
अहमेतमुपास इति स यो हैतमेवमुपास्त एतेषां सर्वेषामात्मा भवति ।१८। तत

ॐ बालाकि स्तूष्णीमास स्तं होवाचाजातशत्रुर्बालाका३ इत्येतावदिति होवाच बा
लाकिस्तं होवाचाजातशत्रुर्मृषा वै खलु मा संवादयिष्ठा ब्रह्म ते ब्रवाणीति यो
वै बालाक एतेषां पुरुषाणां कर्ता यस्य वैतत्कर्म स वै वेदितव्य इति ततउह
बालाकिः समित्पाणिः प्रतिचक्रमउपायानीति तं होवाचाजातशत्रुः प्रतिलो
मरूपमेव तन्मन्ये यत्क्षत्रियो ब्राह्मणमुपनयेत एहि व्येव त्वा ज्ञपयिष्यामीति तं
ह पाणावभिपद्य प्रवव्राज तौ ह सुप्तं पुरुषमाजग्मतुस्तं हाजातशत्रुरामंत्र
यांचक्रे बृहत्पांडरवासः सोम राजन्निति स उ ह तूष्णीमेव शिश्ये तत उ हैनं यष्ट्या वि
चिक्षेप स तत एव समुत्तस्थौ तं होवाचाजातशत्रुः क्वैष एतद्बालाके पुरुषोऽशयि
ष्ट क्वैतदभूत्कुत एतदागादिति ततउह बालाकिर्न विजज्ञे तं होवाचाजातशत्रु
र्यत्रैष एतद्बालाके पुरुषोऽशयिष्ट यत्रैतदभूद्यत एतदागादिति हिता नाम ना
ड्यः पुरुषस्य नाड्यो हृदयात्पुरीततमभिप्रतन्वंति तद्यथा सहस्रधा केशो विपाटि
तस्तावदण्व्यः पिंगलस्याणिम्ना तिष्ठंति शुक्लस्य कृष्णस्य पीतस्य लोहितस्य
च तासु तदा भवति यदा सुप्तः स्वप्नं न कंचन पश्यति। १९। अथास्मिन्प्राण एवैकधा भ १८

वति तदेनं वाक्सर्वैर्नामभिः सहाप्येति चक्षुः सर्वै रूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः स
हाप्येति मनः सर्वैर्ध्यातैः सहाप्येति स यदा प्रतिबुध्यते यथाग्नेर्ज्वलतः सर्वा दिशो विस्फु
लिंगा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठंते प्राणेभ्यो देवा देवेभ्यो
लोकाः स एष प्राण एव प्रज्ञात्मेदं शरीरमात्मानमनुप्रविष्ट आलोमभ्य आनखेभ्य
स्तद्यथा क्षुरः क्षुरधानेऽवहितो विश्वंभरो वा विश्वंभरकुलाय एवमेवैष प्र
ज्ञात्मेदं शरीरमात्मानमनुप्रविष्ट आलोमभ्य आनखेभ्यस्तमेतमात्मानमेत आत्मा
नोऽन्वव्यंते यथा श्रेष्ठिनं स्वास्तद्यथा श्रेष्ठी स्वैर्भुंक्ते यथा वा स्वाः श्रेष्ठिनं भुंजंत्येवमेवैष प्र
ज्ञात्मैतैरात्मभिर्भुंक्ते एवमेवैत आत्मान एतमात्मानं भुंजंतीति स यावद्ध वा इंद्र ए
तमात्मानं न विजज्ञे तावदेनमसुरा अभिबभूवुः स यदा विजज्ञेऽथ हत्वासुरान्वि
जित्य सर्वेषां च देवानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्यैत्तथो एवैवं विद्वान्सर्वान्पा
प्मनोऽपहत्य सर्वेषां च भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेद य एवं वेद। २०
। इत्यारण्यके षष्ठोऽध्यायः। ॥ ॐ वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमावि
रावीर्म एधि वेदस्य म आणीस्थः श्रुतं मे मा प्रहासीरनेनाधीतेनाहोरात्रान्संदधाम्यृतं वदिष्यामि सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवत्ववतु
मामवतु वक्तारमवतु वक्तारम् ... इलानम इलानम
ऋषिभ्यो मंत्रकृद्भ्यो मंत्रपतिभ्यो नमोऽस्तु देवेभ्यः शिवा नः शंतमा भव सुमृडीका सरस्वती मा ते व्योम संदृ

Indira Gandhi National
Centre for the Arts

शि॰ अदध्यं मनदृषिरं चक्षुः सूर्यो ज्योतिषां श्रेष्ठो दीक्षे मा मा हिंसीः ॥१॥ अथातः संहिताउपनिषत्पृ
थिवी पूर्वरूपं द्यौरुत्तररूपं वायुः संहितेति शौरवीरो माण्डूकेय आकाशः संहितेत्यस्य मां
डूक्यो वेदयां चक्रे स हास्मि परिहूत इमे न नमेस्य पुत्रेण सामगो दिति परिहूतो मे नद्द्यागस्य
समानं ह्यत्रापि तु अस्य पुत्रस्य च वायुश्चाकाशश्चेत्यधिदैवतमथाध्यात्मं वाक्पूर्वरूपं मन
उत्तररूपं प्राणः संहितेति शौरवीरो माण्डूकेयोऽथ ह स्मास्य पुत्र आह दीर्घो मनसा वाऽग्रे
ऽग्रे कीर्तयति तद्वाचा वदति तस्मान्मन एव पूर्वरूपं वागुत्तररूपं मनो वाक्प्राणस्त्वे
व संहितेति स एषोऽश्वरथः पृष्टिनामौ हि मनो वाक्प्राणः संहितः स एवं स्वर्गं लोकं ग
मयति स य एवमेतां संहितां वेद संधीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोके
न सर्वमायुरेतीति नु माण्डूकेयानां ॥२॥ शाकल्यस्य पृथिव्याग्निः पृथिवी वागनुव्याहा
राः स यदि निर्ब्रूयात् खलु वै वेयं मध्यमो वाक्प्राणेन माता जाया प्रजा वाग्ब्रह्म इति वालि सर्वं
पूर्वम् ॥३॥ अथ शाकल्यस्य पृथिवी पूर्वरूपं द्यौरुत्तररूपं वायुः संहिताऽन्तरिक्षं संधिः पर्ज
न्यः संधातातद्दृताप्रियत्रैतद्ब्जवदनु गृह्णामाहो मेधा वृष्टिं वर्षति द्यावापृथिव्यौ संधत्तामित्य
धिदैवतमथाध्यात्मं पुरुषोऽयं सर्वं माण्डूकेय द्विवदलेन्नवतस्तस्मोद मिव पूर्वरूपमिदमुत
ररूपं तत्रायमन्तरेणाकाशो यथासौ द्यावापृथिव्योरन्तरेणाकाशस्तस्मिन्नेतास्मिन्नाकाशे
प्राण आयत्तो ऽनवतिय यथासौ तस्मिन्नाकाशे वायुरायत्तोऽनवति यथामूनि त्रीणि ज्योतीष्येवमिमा १९
नि पुरुषे त्रीणि ज्योतींषि यथासौ दिव्यादित्य एवमिदं शिरसि चक्षुर्यथा सावन्तरिक्षे विद्युदेव
मिदमात्मनि हृदयं यथायमग्निः पृथिव्यामेवमिदमुपस्थे रेत एवमिव ह स्म सर्वलोकमात्मा
नमनु विधाय इदमेव पूर्वरूपमित्युत्तररूपं मनो वाक्प्राणस्ते व संहितेति स एषोऽश्वरथः प्रष्टि
वाहनो मनो वाक्प्राणः संहितः स्वर्गं लोकं गमयति स य एवमेतां संहितां वेद संधीयते प्रजया पशु
ब्रह्मव र्चसेन ५ भिर्यशसा स्वर्गेण लोकेन सर्वमायुरेति ॥४॥ पृथिवी पूर्वरूपं द्यौरुत्तररूपं वायुः संहिता
दिशः संहितादित्यः संधातेति वैश्वामित्र इत्यधिदैवतमथाध्यात्मं वाक्पूर्वरूपं मन उत्तररू
पं प्राणः संहिता श्रोत्रं संधिश्चक्षुः संधाता स य एवमेतां संहितां वेद संधीयते प्रजया पशुभि
र्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति ॥५॥ अग्निः पूर्वरूपं चन्द्रमा उत्तररूपं
विद्युत्संहितेति सूर्यदत्त इत्यधिदैवतमथाध्यात्मं वाक्पूर्वरूपं मन उत्तररूपं सत्यं संहिता स य एव
मेतां संहितां वेद संधीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति ॥
द्यावापृथिवी पूर्वरूपं द्यौरुत्तररूपं कालः संहितेति राधेय इत्यधिदैवतमथाध्यात्मं वाक्पूर्वरूपं म
उत्तररूपमात्मा संहिता स य एवमेतां संहितां वेद संधीयते प्रजया पशुभिर्यशसा ब्रह्म
वर्चसेन स्वर्गेण लोकेन सर्वमायुरेति ॥७॥ वाक्पूर्वरूपं मन उत्तररूपं विद्या संहितेति पौष्करसादिः
स य एवमेतां संहितां वेद संधीयते प्रजया पशुभिर्यशसा स्वर्गेण लोकेन सर्वमायुरेति ॥८॥
ब्रह्मवर्चसेन ९

Indira Gandhi National Centre for the Arts

अथातो व्याहाराः प्राणो वंश इति विद्यात्स यदेनं प्राणं वंशं ब्रुवन्तमुपवदेदेकं वन्क
चिच्छेन्मन्येत प्राणं वंशं समधाः प्राणं वंशं समधित्सिठं न शक्नोषीत्याक्रु प्राणस्त्वा वंशो
हास्यतीत्येनं ब्रूयादथ यदेवं कल्कं वन्मन्येत प्राणं वंशं समधित्सीः स्तं नाशकः संधातुं प्राणस्त्वा वंशो
हास्यतीत्येवैनं ब्रूयादथ यथा ... यावद्ब्रुवन्तं ब्रुवन्तं ब्रूयादत्यायेवं तत्तथा स्यान्नेत्येवा-
न्यकुरालाद्ब्राह्मणं ब्रूयादिति ह स्माह ... ब्राह्मणं ब्रूयान्नाति कामेन न ब्राह्मणं ब्रूयान्नमो
स्तु ब्राह्मणेभ्य इति शौरवीरो माण्डूकेयः ॥८॥ स यदि प्राणं वंशं ब्रुवन्तमुपवदेत्कश्चन वंशं
सोन्मन्येत प्राणं वंशं समधित्सिषं प्राणं वंशं समधित्सिठं न शक्नोषीत्याक्रु प्राणस्त्वा वंशो
हास्यतीत्येनं ब्रूयादथ यदेवं कल्कं वन्मन्येत प्राणं वंशं समधित्सीः स्तं नाशकः संधातुं
प्राणस्त्वा वंशो हास्यतीत्येवैनं ब्रूयादथ यथा ब्रुवन्तं वाक्रुवन्तं वा ब्रूयादत्यास
मेव यत्तत्तथा स्यान्नेत्येवान्यकुशलाद्ब्राह्मणं ब्रूयादिति ह स्माह ... ब्राह्मणं ब्रूयान्ना
ति कामेन न ब्राह्मणं ब्रूयान्नमोस्तु ब्राह्मणेभ्य इति शौरवीरो माण्डूकेयः ॥१०॥ अथा
तो निर्भुजप्रवादाः पृथिव्यायतनं निर्भुजं दिवायतनं प्रतृण्णमन्तरिक्षायतनमुभयमन्त
रेण स यदेनं निर्भुजं ब्रुवन्तमुपवदेत्पृथिवीं देवतामारः पृथिवी त्वा देवता रिष्यतीत्ये
नं ब्रूयादथ यद्येनं प्रतृण्णं ब्रुवन्तमुपवदेद्दिवं देवतामारो द्यौस्त्वा देवता रिष्यतीत्येनं २०

ब्रूयादथ यद्येनमुभयमन्तरेण ब्रुवन्तमुपवदेदन्तरिक्षं देवतामारोन्तरिक्षं त्वा देवता रिष्यती
त्येवैनं ब्रूयादथ यदि संधिं विवर्तयति तन्निर्भुजस्य रूपमथ यच्छुद्धे अक्षरे अभिव्याहरति त
त्प्रतृण्णस्याग्र उ एवोभयमन्तरेणोभयं व्याप्तं भवत्यन्नाद्यकामो निर्भुजं ब्रूयात्स्वर्ग
कामः प्रतृण्णमन्तरिक्षायतनमुभयमन्तरेण स यदेनं निर्भुजं ब्रुवन्तमुपवदेदच्यो
ष्ठाः पूर्वरात्र्यां स्थाना च्याविष्टा नन्न ब्रूयादथ यद्येनं प्रतृण्णं ब्रुवन्तमुपवदेदच्योष्ठा उ
त्तरात्र्यां स्थानात्च्यासीत्येवैनं ब्रूयादथ स्वेवोभयमन्तरेण उदतस्य नास्त्युपवादो
यथा नु कथा च ब्रुवन्वा क्रुवन्वा ब्रूयादत्यास समेव यत्तत्तथा स्यान्नेत्येवान्यकु
शलाद्ब्राह्मणं ब्रूयादिति ह स्माहैव ब्राह्मणं ब्रूयान्नाति कामेन च ब्राह्मणं ब्रूयान्न
मोस्तु ब्राह्मणेभ्य इति शौरवीरो माण्डूकेयः ॥११॥ अथ खल्वाज्ञानिर्भुजवक्त्राः पूर्व
मेवाक्षरं पूर्वरूपमुत्तरमुत्तररूपं यकारवकारावन्तरेण सा संहितेति स य एवमे
तां संहितां वेद संधीयते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन स
र्वमायुरेति ॥१२॥ अथ वै वयं ब्रूमो निर्भुजवक्त्रा स्मरति हस्मा हस्वा माण्डूकेयः
पूर्वमेवाक्षरं पूर्वरूपमुत्तरमुत्तररूपं तथा सोऽमात्रा पूर्वरूपोत्तररूपे अन्तरेण येन
